योगवासिष्ठः/प्रकरणम् १ (वैराग्यप्रकरणम्)/सर्गः १०

दशमः सर्गः

वाल्मीकिरुवाच ।

तथा वसिष्ठे ब्रुवति राजा दशरथः सुतम् ।

संप्रहृष्टमना राममाजुहाव सलक्ष्मणम् ।। १

दशरथ उवाच ।

प्रतिहार महाबाहुं रामं सत्यपराक्रमम् ।

सलक्ष्मणमविघ्नेन पुण्यार्थं शीघ्रमानय ।। २

इति राज्ञा विसृष्टोऽसौ गत्वान्तःपुरमन्दिरम् ।

मुहूर्तमात्रेणागत्य समुवाच महीपतिम् ।। ३

देव दोर्दलिताशेषरिपो रामः स्वमन्दिरे ।

विमनाः संस्थितो रात्रौ षट्पदः कमले यथा ।। ४

आगच्छामि क्षणेनेति वक्ति ध्यायति चैकतः ।

न कस्यचिच्च निकटे स्थातुमिच्छति खिन्नधीः ।। ५

इत्युक्तस्तेन भूपालस्तं रामानुचरं जनम् ।

सर्वमाश्वासयामास पप्रच्छ च यथाक्रमम् ।। ६

कथं कीदृग्विधो राम इति पृष्टो महीभृता ।

रामभृत्यजनः खिन्नो वाक्यमाह महीपतिम् ।। ७

देहयष्टिमिमां देव धारयन्त इमे वयम् ।

खिन्नाः खेदे परिम्लानतनौ रामे सुते तव ।। ८

रामो राजीवपत्राक्षो यतःप्रभृति चागतः ।

सविप्रस्तीर्थयात्रायास्ततःप्रभृति दुर्मनाः ।। ९

यत्नप्रार्थनयास्माकं निजव्यापारमाह्निकम् ।

सोऽयमाम्लानवदनः करोति न करोति वा ।। १०

स्नानदेवार्चनादानभोजनादिषु दुर्मनाः ।

प्रार्थितोऽपि हि नातृप्तेरश्नात्यशनमीश्वरः ।। ११

लोलान्तःपुरनारीभिः कृतदोलाभिरङ्गणे ।

नच क्रीडति लीलाभिर्धाराभिरिव चातकः ।। १२

माणिक्यमुकुलप्रोता केयूरकटकावलिः ।

नानन्दयति तं राजन्द्यौः पातविषयं यथा ।। १३

क्रीडद्वधूविलोकेषु वहत्कुसुमवायुषु ।

लतावलयगेहेषु भवत्यतिविषादवान् ।। १४

यद्द्रव्यमुचितं स्वादु पेशलं चित्तहारि च ।

बाष्पपूर्णेक्षण इव तेनैव परिखिद्यते ।। १५

किमिमा दुःखदायिन्यः प्रस्फुरन्तीः पुराङ्गनाः ।

इति नृत्तविलासेषु कामिनीः परिनिन्दति ।। १६

भोजनं शयनं यानं विलासं स्नानमासनम् ।

उन्मत्तचेष्टित इव नाभिनन्दत्यनिन्दितम् ।। १७

किं संपदा किं विपदा किं गेहेन किमिङ्गितैः ।

सर्वमेवासदित्युक्त्वा तूष्णीमेकोऽवतिष्ठते ।। १८

नोदेति परिहासेषु न भोगेषु निमज्जति ।

न च तिष्ठति कार्येषु मौनमेवावलम्बते ।। १९

विलोलालकवल्लर्यो हेलावलितलोचनाः ।

नानन्दयन्ति तं नार्यो मृग्यो वनतरुं यथा ।। २०

एकान्तेषु दिगन्तेषु तीरेषु विपिनेषु च ।

रतिमायात्यरण्येषु विक्रीत इव जन्तुषु ।। २१

वस्त्रपानाशनादानपराङ्मुखतया तया ।

परिव्राड्धर्मिणं भूय सोऽनुयाति तपस्विनम् ।। २२

एक एव वसन्देशे जनशून्ये जनेश्वर ।

न हसत्येकया बुद्ध्या न गायति न रोदिति ।। २३

बद्धपद्मासनः शून्यमना वामकरस्थले ।

कपोलतलमाधाय केवलं परितिष्ठति ।। २४

नाभिमानमुपादत्ते न च वाञ्छति राजताम् ।

नोदेति नास्तमायाति सुखदुःखानुवृत्तिषु ।। २५

न विद्मः किमसौ याति किं करोति किमीहते ।

किं ध्यायति किमायाति कथं किमनुधावति ।। २६

प्रत्यहं कृशतामेति प्रत्यहं याति पाण्डुताम्।

विरागं प्रत्यहं याति शरदन्त इव द्रुमः ।। २७

अनुयातौ तथैवैतौ राजञ्छत्रुघ्नलक्ष्मणौ ।

तादृशावेव तस्यैव प्रतिबिम्बाविव स्थितौ ।। २८

भृत्यै राजभिरम्बाभिः संपृष्टोऽपि पुनः पुनः ।

उक्त्वा न किंचिदेवेति तूष्णीमास्ते निरीहितः ।। २९

आपातमात्रहृद्येषु मा भोगेषु मनः कृथाः ।

इति पार्श्वगतं भव्यमनुशास्ति सुहृज्जनम् ।। ३०

नानाविभवरम्यासु स्त्रीषु गोष्ठीगतासु च ।

पुरस्थितमिवास्नेहो नाशमेवानुपश्यति ।। ३१

नीतमायुरनायासपदप्राप्तिविवर्जितैः ।

चेष्टितैरिति काकल्या भूयोभूयः प्रगायति ।। ३२

सम्राड्भवेति पार्श्वस्थं वदन्तमनुजीविनम् ।

प्रलपन्तमिवोन्मत्तं हसत्यन्यमना मुनिः ।। ३३

न प्रोक्तमाकर्णयति ईक्षते न पुरोगतम् ।

करोत्यवज्ञां सर्वत्र सुसमेत्यापि वस्तुनि ।। ३४

अप्याकाशसरोजिन्या अप्याकाशमहावने ।

इत्थमेतन्मन इति विस्मयोऽस्य न जायते ।। ३५

कान्तामध्यगतस्यापि मनोऽस्य मदनेषवः ।

न भेदयन्ति दुर्भेद्यं धारा इव महोपलम्।। ३६

आपदामेकमावासमभिवाञ्छसि किं धनम् ।

अनुशिष्येति सर्वस्वमर्थिने संप्रयच्छति ।। ३७

इयमापदियं संपदित्येवं कल्पनामयः ।

मनसोऽभ्युदितो मोह इति श्लोकान्प्रगायति ।। ३८

हा हतोऽहमनाथोऽहमित्याक्रन्दपरोऽपि सन् ।

न जनो याति वैराग्यं चित्रमित्येव वक्त्यसौ ।। ३९

रघुकाननशालेन रामेण रिपुघातिना ।

भृशमित्थं स्थितेनैव वयं खेदमुपागताः ।। ४०

न विद्मः किं महाबाहो तस्य तादृशचेतसः ।

कुर्मः कमलपत्राक्ष गतिरत्र हि नो भवान् ।। ४१

राजानमथवा विप्रमुपदेष्टारमग्रतः ।

हसत्यज्ञमिवाव्यग्रः सोऽवधीरयति प्रभो ।। ४२

यदेवेदमिदं स्फारं जगन्नाम यदुत्थितम् ।

नैतद्वस्तु नचैवाहमिति निर्णीय संस्थितः ।। ४३

नारौ नात्मनि नो मित्रे न राज्ये न च मातरि ।

न संपदा न विपदा तस्यास्था न विभो बहिः ।। ४४

निरस्तास्थो निराशोऽसौ निरीहोऽसौ निरास्पदः ।

न मूढो न च मुक्तोऽसौ तेन तप्यामहे भृशम् ।। ४५

किं धनेन किमम्बाभिः किं राज्येन किमीहया ।

इति निश्चयवानन्तः प्राणत्यागपरः स्थितः ।। ४६

भोगेऽप्यायुषि राज्येषु मित्रे पितरि मातरि ।

परमुद्वेगमायातश्चातकोऽवग्रहे यथा ।। ४७

इति तोके समायातां शाखाप्रसरशालिनीम् ।

आपत्तामलमुद्धर्तुं समुदेतु दयापरः ।। ४८

तस्य तादृक्स्वभावस्य समग्रविभवान्वितम् ।

संसारजालमाभोगि प्रभो प्रतिविषायते ।। ४९

ईदृशः स्यान्महासत्त्वः क इवास्मिन्महीतले ।

प्रकृते व्यवहारे तं यो निवेशयितुं क्षमः ।। ५०

मनसि मोहमपास्य महामनाः

सकलमार्तितमः किल साधुताम् ।

सफलतां नयतीह तमो हरन्

दिनकरो भुवि भास्करतामिव ।। ५१

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये वैराग्यप्रकरणे राघवविषादो नाम दशमः सर्गः ।।१० ।।